# श्रीमद् भागवत रसिक कुटुंब

## देवी अपराध क्षमापन स्तोत्र, कीलकम्

## श्रीदुर्गासप्तशती (त्रयोदश अध्याय)

## देवी अपराध क्षमापन स्तोत्र

न मंत्रं(न्) नो यन्त्रं(न्),तदपि च न जाने स्तुतिमहो
न चाह्वानं(न्) ध्यानं(न्), तदपि च न जाने स्तुतिकथाः।
न जाने मुद्रास्ते, तदपि च न जाने विलपनं
परं(ञ्) जाने मातस्-त्वदनुसरणं(ङ्) क्लेशहरणम् ॥1॥

विधेरज्ञानेन, द्रविणविरहेणालसतया
विधेयाशक्यत्वात्-तव चरणयोर्या च्युतिरभूत् ।
तदेतत् क्षन्तव्यं(ञ्), जननि सकलोद्धारिणि शिवे
कुपुत्रो जायेत, क्वचिदपि कुमाता न भवति ॥2॥

पृथिव्यां पुत्रास्ते, जननि बहवः(स्) सन्ति सरलाः
परं(न्) तेषां मध्ये, विरलतरलोऽहं(न्) तव सुतः ।
मदीयोऽयं(न्) त्यागः(स्), समुचितमिदं(न्) नो तव शिवे
कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ॥3॥

जगन्मातर्मातस्-तव चरणसेवा न रचिता

न वा दत्तं(न्) देवि, द्रविणमपि भूयस्तव मया ।
तथापि त्वं स्नेहं , मयि निरुपमं यत्प्रकुरुषे
कुपुत्रो जायेत , क्वचिदपि कुमाता न भवति ॥4॥

परित्यक्ता देवा,  विविधविधसेवाकुलतया
मया पञ्चाशीते-रधिकमपनीते तु वयसि ।
इदानीं(ञ्) चेन्मातस्-तव यदि कृपा नापि भविता
निरालम्बो लम्बो-दरजननि कं यामि शरणम् ॥5॥

श्वपाको जल्पाको, भवति मधुपाकोपमगिरा
निरातङ्को रङ्को , विहरति चिरं(ङ्) कोटिकनकैः ।
तवापर्णे कर्णे , विशति मनुवर्णे फलमिदं(ञ्)
जनः(ख्) को जानीते, जननि जपनीयं(ञ्) जपविधौ ॥6॥

चिताभस्मालेपो, गरलमशनं(न्) दिक्पटधरो
जटाधारी कण्ठे, भुजगपतिहारी पशुपतिः ।
कपाली भूतेशो , भजति जगदीशैकपदवीं
भवानि त्वत्पाणि-ग्रहणपरिपाटीफलमिदम् ॥7॥

न मोक्षस्याकाङ्क्षा ,भवविभववाञ्छापि च न मे
न विज्ञानापेक्षा, शशिमुखि सुखेच्छापि न पुनः ।
अतस्त्वां संयाचे, जननि जननं यातु मम वै
मृडानी रुद्राणी, शिव शिव भवानीति जपतः ॥8॥

नाराधितासि विधिना विविधोपचारैः,
किं रुक्षचिन्तनपरैर्न कृतं वचोभिः ।
श्यामे त्वमेव यदि किञ्चन मय्यनाथे,
धत्से कृपामुचितमम्ब परं(न्) तवैव ॥9॥

आपत्सु मग्नः(स्) स्मरणं(न्) त्वदीयं(ङ्)
करोमि दुर्गे करुणार्णवेशि ।
नैतच्छठत्वं मम भावयेथाः(ह्),
क्षुधातृषार्ता जननीं स्मरन्ति ॥10॥

जगदम्ब विचित्रमत्र किं,
परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परापरं(न्),
न हि माता समुपेक्षते सुतम् ॥11॥

मत्समः(फ्) पातकी नास्ति, पापघ्नी त्वत्समा न हि ।
एवं(ञ्) ज्ञात्वा महादेवि, यथायोग्यं(न्) तथा कुरु ॥12॥

# कीलकम्

ॐ अस्य श्रीकीलकमन्त्रस्य शिवऋषिः, अनुष्टुप् छन्दः,
श्रीमहासरस्वती देवता, श्रीजगदम्बाप्रीत्यर्थं(म्)
सप्तशतीपाठाङ्गत्वेन जपे विनियोगः ।

ॐ नमश्चण्डिकायै ।

मार्कण्डेय उवाच ।

ॐ विशुद्धज्ञानदेहाय त्रिवेदीदिव्यचक्षुषे ।
श्रेयः(फ्)प्राप्तिनिमित्ताय नमः(स्) सोमार्धधारिणे ॥ 1॥

सर्वमेतद्विजानीयान्मन्त्राणामपि कीलकम् ।
सोऽपि क्षेममवाप्नोति सततं(ञ्) जप्यतत्परः ॥ 2॥

सिद्ध्यन्त्युच्चाटनादीनि कर्माणि सकलान्यपि ।
एतेन स्तुवतां(न्) देवीं(म्) स्तोत्रवृन्देन भक्तितः ॥ 3॥

न मन्त्रो नौषधं(न्) तस्य न किञ्चिदपि विद्यते ।
विना जप्येन सिद्ध्येत्तु सर्वमुच्चाटनादिकम् ॥ 4॥

समग्राण्यपि सेत्स्यन्ति लोकशङ्कामिमां(म्) हरः ।
कृत्वा निमन्त्रयामास सर्वमेवमिदं(म्) शुभम् ॥ 5॥

स्तोत्रं(वँ) वै चण्डिकायास्तु तच्च गुह्यं(ञ्) चकार सः ।
समाप्नोति स पुण्येन तां(यँ) यथावन्निमन्त्रणाम् ॥ 6॥

सोऽपि क्षेममवाप्नोति सर्वमेव न सं(म्)शयः ।
कृष्णायां(वँ) वा चतुर्दश्यामष्टम्यां(वँ) वा समाहितः ॥ 7॥

ददाति प्रतिगृह्णाति नान्यथैषा प्रसीदति ।

इत्थं(म्) रूपेण कीलेन महादेवेन कीलितम् ॥ 8॥

यो निष्कीलां(वँ) विधायैनां(ञ्) चण्डीं(ञ्) जपति नित्यशः ।
स सिद्धः(स्) स गणः(स्) सोऽथ गन्धर्वो जायते ध्रुवम् ॥ 9॥

न चैवापाटवं(न्) तस्य भयं(ङ्) क्वापि न जायते ।
नापमृत्युवशं(यँ) याति मृते च मोक्षमाप्नुयात् ॥ 10॥

ज्ञात्वा प्रारभ्य कुर्वीत ह्यकुर्वाणो विनश्यति ।
ततो ज्ञात्वैव सम्पूर्णमिदं(म्) प्रारभ्यते बुधैः ॥ 11॥

सौभाग्यादि च यत्किञ्चिद् दृश्यते ललनाजने ।
तत्सर्वं(न्) तत्प्रसादेन तेन जप्यमिदं(म्) शुभम् ॥ 12॥

शनैस्तु जप्यमानेऽस्मिन् स्तोत्रे सम्पत्तिरुच्चकैः ।
भवत्येव समग्रापि ततः(फ्) प्रारभ्यमेव तत् ॥ 13॥

ऐश्वर्यं(न्) तत्प्रसादेन सौभाग्यारोग्यमेव च ।
शत्रुहानिः(फ्) परो मोक्षः(स्) स्तूयते सा न किं(ञ्) जनैः ॥ 14॥

चण्डिकां(म्) हृदयेनापि यः(स्) स्मरेत् सततं(न्) नरः ।
हृद्यं(ङ्) काममवाप्नोति हृदि देवी सदा वसेत् ॥ 15॥

अग्रतोऽमुं(म्) महादेवकृतं(ङ्) कीलकवारणम् ।

निष्कीलञ्च तथा कृत्वा पठितव्यं(म्) समाहितैः ॥ 16॥

॥ इति श्रीभगवत्याः(ख्) कीलकस्तोत्रं(म्) समाप्तम् ॥

# श्रीदुर्गासप्तशती (त्रयोदश अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥श्रीदुर्गासप्तशती ॥

॥ अथ त्रयोदशोऽध्यायः ॥

। ध्यानम् ।

ॐ बालार्कमण्डलाभासां(ञ्), चतुर्बाहुं(न्) त्रिलोचनाम् ।
पाशाङ्कुशवराभीतिर्- धारयन्तीं(म्) शिवां(म्) भजे ॥

ॐ ऋषिरुवाच ॥ 1॥

एतत्ते कथितं(म्) भूप, देवीमाहात्म्यमुत्तमम् ।
एवं(म्)प्रभावा सा देवी, ययेदं(न्) धार्यते जगत् ॥ 2॥

विद्या तथैव क्रियते, भगवद्विष्णुमायया ।
तया त्वमेष वैश्यश्च, तथैवान्ये विवेकिनः ॥ 3॥

मोह्यन्ते मोहिताश्चैव, मोहमेष्यन्ति चापरे ।
तामुपैहि महाराज, शरणं(म्) परमेश्वरीम् ॥ 4॥

आराधिता सैव नृणां(म्), भोगस्वर्गापवर्गदा ॥ 5॥

मार्कण्डेय उवाच ॥ 6॥

इति तस्य वचः(श्) श्रुत्वा, सुरथः(स्) स नराधिपः ॥ 7॥

प्रणिपत्य महाभागं(न्), तमृषिं(म्) शंसितव्रतम् ।
निर्विण्णोऽतिममत्वेन, राज्यापहरणेन च ॥ 8॥

जगाम सद्यस्तपसे, स च वैश्यो महामुने ।
सन्दर्शनार्थमम्बाया, नदीपुलिनसंस्थितः ॥ 9॥

स च वैश्यस्तपस्तेपे, देवीसूक्तं(म्) परं(ञ्) जपन् ।
तौ तस्मिन् पुलिने देव्याः(ख्), कृत्वा मूर्तिं(म्) महीमयीम् ॥ 10॥

अर्हणां(ञ्) चक्रतुस्तस्याः(फ्), पुष्पधूपाग्नितर्पणैः ।
निराहारौ यताहारौ, तन्मनस्कौ समाहितौ ॥ 11॥

ददतुस्तौ बलिं(ञ्) चैव, निजगात्रासृगुक्षितम् ।
एवं(म्) समाराधयतोस्- त्रिभिर्वर्षैर्यतात्मनोः ॥ 12॥

परितुष्टा जगद्धात्री, प्रत्यक्षं(म्) प्राह चण्डिका ॥ 13॥

देव्युवाच ॥ 14॥

**यत्प्रार्थ्यते त्वया भूप, त्वया च कुलनन्दन ।**
**मत्तस्तत्प्राप्यतां(म्) सर्वं(म्), परितुष्टा ददामि तत् ॥ 15॥**

**मार्कण्डेय उवाच ॥ 16॥**

**ततो वव्रे नृपो राज्य- मविभ्रं(म्)श्यन्यजन्मनि ।**
**अत्रैव च निजं(म्) राज्यं(म्), हतशत्रुबलं(म्) बलात् ॥ 17॥**

**सोऽपि वैश्यस्ततो ज्ञानं(वँ), वव्रे निर्विण्णमानसः ।**
**ममेत्यहमिति प्राज्ञः(स्), सङ्गविच्युतिकारकम् ॥ 18॥**

**देव्युवाच ॥ 19॥**

**स्वल्पैरहोभिर्नृपते, स्वं(म्) राज्यं(म्) प्राप्स्यते भवान् ॥ 20॥**

**हत्वा रिपूनस्खलितं(न्), तव तत्र भविष्यति ॥ 21॥**

**मृतश्च भूयः(स्) सम्प्राप्य, जन्म देवाद्विवस्वतः ॥ 22॥**

**सावर्णिको नाम मनुर्-भवान् भुवि भविष्यति ॥ 23॥**

**वैश्यवर्य त्वया यश्च, वरोऽस्मत्तोऽभिवाञ्छितः ॥ 24॥**

**तं(म्) प्रयच्छामि सं(म्)सिद्ध्यै, तव ज्ञानं(म्) भविष्यति ॥ 25॥**

मार्कण्डेय उवाच ॥ 26॥

इति दत्त्वा तयोर्देवी, यथाभिलषितं(व्ँ) वरम् ॥ 27॥

बभूवान्तर्हिता सद्यो, भक्त्या ताभ्यामभिष्टुता ।
एवं(न्) देव्या वरं(ल्ँ) लब्ध्वा, सुरथः क्षत्रियर्षभः ॥ 28॥

सूर्याज्जन्म समासाद्य, सावर्णिर्भविता मनुः ॥ 29॥

एवं(न्) देव्या वरं(ल्ँ) लब्ध्वा, सुरथः क्षत्रियर्षभः ।
सूर्याज्जन्म समासाद्य, सावर्णिर्भविता मनुः ॥ क्लीं ॐ ॥

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
सुरथवैश्ययोर्वरप्रदानं(न्) नाम त्रयोदशोऽध्यायः ॥

उवाच 6, अर्धश्लोकाः 11, श्लोकाः 12, एवम् 29 एवमादितः 700

समस्ता उवाचमन्त्राः 57, अर्धश्लोकाः 42, श्लोकाः 535, अवदानानि 66 ॥

॥ श्रीसप्तशतीदेवीमाहात्म्यं समाप्तम् ॥
॥ ॐ तत् सत् ॐ ॥